श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये किष्किन्धाकाण्डे

# ॥ चतुर्दशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ चतुर्दशः सर्गः ॥

## वालिनो वधाय श्रीरामस्याश्वासनं प्राप्य सुग्रीवस्य घोरं गर्जनम्

सर्वे ते त्वरितं गत्वा किष्किन्धां वालिनः पुरीम्।
वृक्षैरात्मानमावृत्य व्यतिष्ठन् गहने वने॥ **4.14.1** ॥

विसार्य सर्वतो दृष्टिं कानने काननप्रियः।
सुग्रीवो विपुलग्रीवः क्रोधमाहारयद् भृशम्॥ **4.14.2** ॥

ततस्तु निनदं घोरं कृत्वा युद्धाय चाह्वयत्।
परिवारैः परिवृतो नादैर्भिन्दन्निवाम्बरम्॥ **4.14.3** ॥

गर्जन्निव महामेघो वायुवेगपुरःसरः।
अथ बालार्कसदृशो दृप्तसिंहगतिस्ततः॥ **4.14.4** ॥

दृष्ट्वा रामं क्रियादक्षं सुग्रीवो वाक्यमब्रवीत्।
हरिवागुरया व्याप्तां तप्तकाञ्चनतोरणाम्॥ **4.14.5** ॥

प्राप्ताः स्म ध्वजयन्त्राढ्यां किष्किन्धां वालिनः पुरीम्।
प्रतिज्ञा या कृता वीर त्वया वालिवधे पुरा॥ **4.14.6** ॥

सफलां कुरु तां क्षिप्रं लतां काल इवागतः।
एवमुक्तस्तु धर्मात्मा सुग्रीवेण स राघवः॥ **4.14.7** ॥

तमेवोवाच वचनं सुग्रीवं शत्रुसूदनः।
कृताभिज्ञानचिह्नस्त्वमनया गजसाह्वया ॥ **4.14.8** ॥

लक्ष्मणेन समुत्पाट्य एषा कण्ठे कृता तव।
शोभसेऽप्यधिकं वीर लतया कण्ठसक्तया ॥ **4.14.9** ॥

विपरीत इवाकाशे सूर्यो नक्षत्रमालया।
अद्य वालिसमुत्थं ते भयं वैरं च वानर ॥ **4.14.10** ॥

एकेनाहं प्रमोक्ष्यामि बाणमोक्षेण संयुगे।
मम दर्शय सुग्रीव वैरिणं भ्रातृरूपिणम् ॥ **4.14.11** ॥

वाली विनिहतो यावद्वने पांसुषु चेष्टते।
यदि दृष्टिपथं प्राप्तो जीवन् स विनिवर्तते ॥ **4.14.12** ॥

ततो दोषेण मा गच्छेत् सद्यो गर्हेच्च मां भवान्।
प्रत्यक्षं सप्त ते साला मया बाणेन दारिताः ॥ **4.14.13** ॥

तेनावेहि बलेनाद्य वालिनं निहतं रणे।
अनृतं नोक्तपूर्वं मे चिरं कृच्छ्रेऽपि तिष्ठता ॥ **4.14.14** ॥

धर्मलोभपरीतेन न च वक्ष्ये कथञ्चन।
सफलां च करिष्यामि प्रतिज्ञां जहि सम्भ्रमम् ॥ **4.14.15** ॥

प्रसूतं कलमक्षेत्रं वर्षेणेव शतक्रतुः।
तदाह्वाननिमित्तं च वालिनो हेममालिनः ॥ **4.14.16** ॥

सुग्रीव कुरु तं शब्दं निष्पतेद् येन वानरः।
जितकाशी जयश्लाघी त्वया चाधर्षितः पुरात् ॥ **4.14.17** ॥

निष्पतिष्यत्यसङ्गेन वाली स प्रियसंयुगः।
रिपूणां धर्षितं श्रुत्वा मर्षयन्ति न संयुगे ॥ **4.14.18** ॥

जानन्तस्तु स्वकं वीर्यं स्त्रीसमक्षं विशेषतः।
स तु रामवचः श्रुत्वा सुग्रीवो हेमपिङ्गलः॥ **4.14.19** ॥

ननर्द क्रूरनादेन विनिर्भिन्दन्निवाम्बरम्।
तत्र शब्देन वित्रस्ता गावो यान्ति हतप्रभाः॥ **4.14.20** ॥

राजदोषपरामृष्टाः कुलस्त्रिय इवाकुलाः।
द्रवन्ति च मृगाः शीघ्रं भग्ना इव रणे हयाः।
पतन्ति च खगा भूमौ क्षीणपुण्या इव ग्रहाः॥ **4.14.21** ॥

ततः स जीमूतकृतप्रणादो
    नादं ह्यमुञ्चत् त्वरया प्रतीतः।
सूर्यात्मजः शौर्यविवृद्धतेजाः
    सरित्पतिर्वानिलचञ्चलोर्मिः॥ **4.14.22** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
किष्किन्धाकाण्डे चतुर्दशः सर्गः॥